# 2017

## M. A. Part–II

## SANSKRIT

### PAPER–V

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right hand margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

### First Half – 60 Marks

1. एकः प्रश्नः समाधेयः – 10

क) मम्मटमते काव्यप्रयोजनानि व्याख्यायन्ताम् ।

ख) काव्यस्वरूपं काव्यप्रकाशकारमतानुसारं प्रतिपाद्यताम् ।

ग) सप्रसङ्गं व्याख्यायताम् –

i) एतद्विलक्षणा तु कविवाङ्निर्मितिः ।

ii) शक्तिः कवित्वबीजरूपसंस्कारविशेषः ।

2. एकः प्रश्नः समाधेयः — 10

क) वाचकस्वरूपं मम्मटदिशा उपस्थाप्यताम् ।

ख) का नाम लक्षणा ? तस्याः आरोपितत्वं सोदाहरणं यथाग्रन्थमालोच्यताम् ।

ग) सप्रसङ्गं व्याख्यायताम् —

i) तात्पर्यार्थोऽपि केषुचित् ।

ii) व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने ।

3. प्रश्नद्वयं समाधेयम् — 10×2

क) सलक्षणं सभेदं सोदाहरणमुपमास्वरूपं मम्मटोक्त — दिशा प्रस्तूयताम् ।

ख) सलक्षणं सोदाहरणं द्वयं व्याख्येयम् — यमकम्, रूपकम्, अप्रस्तुतप्रशंसा, अतिशयोक्तिः ।

ग) सयुक्तिकं सलक्षणमलंकारनिर्णयः क्रियताम् —

i) अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः ॥

ii) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

घ) उभयोर्मध्ये पार्थक्यं निरूपयत —

i) दृष्टान्तनिदर्शनयोः ।

ii) दीपकतुल्ययोगितयोः ।





4. एकः प्रश्नः समाधेयः — 14

क) ध्वनिविरोधिमतवादेषु अभाववादिनां वक्तव्यं स्पष्टीक्रियताम् ।

ख) प्रतीयमानार्थस्वरूपं सोदाहरणं ध्वन्यालोकानुसारम् आलोच्यताम् ।

5. सप्रसङ्गमेका व्याख्येया — 6

क) स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन् ।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते ॥

ख) यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सुरिभिःकथितः ॥

## Second Half [Marks-40]

1. नाट्यशास्त्रस्य प्रथमाध्याये उल्लिखितस्य जर्जरदण्डस्य उपाख्यानमुल्लिख्य तन्महिमानं वर्णयत । 14

अथवा

अभिनवभारतीमनुसृत्य अभिव्यक्तिवादस्य आशयः स्फुटीक्रियताम् ।

2. a) अधोलिखितेषु कस्यचिदेकस्य व्याख्या कार्या — 6

i) जग्राह पाठयमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥

ii) सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रदर्शकम् ।
नाट्याख्यं पञ्चमं वेद सेतिहासं करोम्यहम् ॥

iii) न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न स योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥

अथवा

b) अधोलिखितेषु यथेच्छं द्वितयस्य टीका लेख्या — 3×2

नान्दी, रङ्गपूजनस्य महत्त्वम्, अनुभावः, करुणरसः ।

3. नाट्य-नृत्य-नृत्त-शब्दानां धातूल्लेखपूर्वकं लक्षणमुल्लिख्यताम् । तत्र तेषां स्वरूपं दृष्टान्तमुखेन प्रतिपाद्य सादृश्य वैसादृश्यश्च निरूप्यताम् । 14

अथवा

व्याख्यायताम् —

अधिकारो फलस्वाम्यमधिकारी च तत्प्रभुः ।

4. अधोलिखितेषु यथेच्छं द्वितयस्य टीका लेख्या — 6

प्रकरी, विन्दुः, प्रवेशकः, विमर्शसन्धिः ।

—o—